**क्रयविक्रयिक** पु० क्रयविक्रयाभ्यां जीवति ठन्। वणिग्जने "वस्नक्रयविक्रयाट्ठन्" पा० क्रयविक्रयग्रहणं व्यस्तसमस्तविषयम् तेन व्यस्तादपि ठन्। क्रयिक विक्रयिक तेन जीविनि त्रि०।

**क्रयशीर्ष** न० कपिशीर्ष+पृषो०। कपिशीर्षं त्रिका०।

**क्रयाक्रयिका** क्रयसहितः अक्रयः शाक० स्वार्थे क अत इत्त्वम्। क्रये अक्रये च।

**क्रयारोह** पु० क्रयस्य क्रयार्थमारोहत्यत्र आ+रुह आधारे घञ् चतुर्थ्यर्थे ६त०। हट्टे (हाट) हारा०।

**क्रयिक** त्रि० क्रयेण जीवति क्रयात् व्यस्तादपि ठन्। वणिग्जने "पर्य्यायतः क्रयिकलोकमगण्यपण्ये"त्यादि" माघः क्रय+प्रयोजनमस्त्यस्य ठन्। २क्रेतरि "धनेन क्रयिको हन्ति खादकश्चोपभोगतः। घातको बधबन्धाभ्यामित्येष त्रिविधो बधः" भा० आनु० ११५अ०

**क्रय्य** त्रि० क्रयाय क्रेतारः क्रीणीयुरितिबुद्ध्या प्रसारितम् क्री–यत् "क्रय्यस्तदर्थे" पा० नि०। क्रयनिमित्तं हट्टे प्रसारिते द्रव्ये "क्रय्यस्ते सोमो राजा इति क्रय्य इत्याह सोमविक्रयी" शत० ब्रा० ३,३,३,१,

**क्रवण** त्रि० क्रुङ-शब्दे ल्यु। १स्तुतिकर्त्तरि "अत्रा न हार्दि क्रवणस्य रेजते" ऋ० ५,४४,८, "क्रवणस्य स्तुतिकर्त्तुः" भा० भावे ल्युट्। २शब्दकरणे न०

**क्रविष्णु** त्रि० क्रु–बा० इष्णुच्। क्रव्यादे राक्षसादौ "क्रव्यात् क्रविष्णुर्विविनोतु वृक्णम्" ऋ० १,८७,४,

**क्रविस्** न० क्लव-इसुन् लस्य रः। मांसे क्रव्ये। "यदश्वस्य क्रविषो गन्धोऽस्ति" ऋ० १,१६२,९,१२, "क्रविषः मांसस्य" भा०

**क्रव्य** न० क्लव-यत् लस्य रः। आममांसे अमरः। "स्फुटगतमपि क्रव्यमव्यग्रमत्ति" मालती०। "क्रव्यादाः प्राणिनां क्रव्यं दुदुहुः स्वकलेवरात्" भाग० ४,१८,२२,। मांसभेदास्तद्गुणाश्च सुश्रुते उक्ता यथा

"अत ऊर्द्ध्वं मांसवर्गानुपदेक्ष्यामः तद्यथा—जलेशया आनूपा ग्राम्याः क्रव्यभुज एकशफा जाङ्गलाश्चेति षण्मांसवर्गास्तेषां वर्गाणामुत्तरोत्तरं प्रधानतमाः। ते पुनर्द्विविधा जाङ्गला आनूपाश्चेति। तत्र जाङ्गलवर्गोऽष्टविधः तद्यथा—जाङ्गला विष्किराः प्रतुदा गुहाशयाः प्रसहाः पर्णमृगा बिलेशया ग्राम्याश्चेति। तेषां जाङ्गलविष्किरौ प्रधानतमौ तावेण हरिणर्क्ष्यकुरङ्गकरालकृतमालशरभश्वदंष्ट्रापृषतचारुष्करमृगमातृकाप्रभृतयो जाङ्गला मृगाः कषाया मधुरा लघवो वातपित्तहरास्तीक्ष्णा हृद्या वस्तिशोधनाश्च। कषायो मधुरो हृद्यः पित्तासृक्कफरोगहा। संग्राही रोचको बल्यस्तेषामेणो ज्वरापहः। मधुरो मधुरः पाके दोषघ्नोऽनलदीपनः। शीतलो बद्धविण्मूत्रः सुगन्धिर्हरिणो लघुः। एणः कृष्णस्तयोर्ज्ञेयो हरिणस्ताम्र उच्यते। न कृष्णो नच ताम्रश्च कुरङ्गः सोऽभिधीयते। शीतासृक्पित्तशमनी विज्ञेया मृगमातृका। सन्निपातक्षयश्वासकासहिक्काऽरुचिप्रणुत्। लावतित्तिरिकपिञ्जलवर्त्तीरवर्त्तिकावर्त्तकनप्तृकावार्तीकचकोरकलविङ्कमयूरक्रकरोपचक्रकुक्कुटसारङ्गशतपत्रककुतित्तिरिकुररात्कुयवलकप्रभृतयस्त्र्याह्वणा विष्किरा लघवः शीतमधुराः कषाया दोषशमनाश्च। संग्राही दीपनश्चैव कषायमधुरो लघुः। लावः कटुविपाकश्च सन्निपाते च पूजितः। ईषद्गुरूष्णमधुरो वृष्यो मेधाग्निवर्द्धनः। तित्तिरिः सर्वदोषघ्नो ग्राही वर्णप्रसादनः। हिक्काश्वासानिलहरो विशेषाद्गौरतित्तिरिः। रक्तपित्तहरः शीतो लघुश्चापि कपिञ्जलः। कफोत्थेषु च रोगेषु मन्दवाते च शस्यते। वातपित्तहरा वृष्या मेधाग्निबलवर्द्धनाः। लघवः क्रकरा हृद्यास्तथा चैवोपचक्रकाः। कषायः स्वादुलवणस्त्वच्यः केश्यो रुचिप्रदः। मयूरः स्वरमेधाग्निदृक्श्रोत्रेन्द्रियकार्श्यकृत्। स्निग्धोष्णोऽनिलहा वृष्यः स्वेदस्वरबलावहः। वृंहणः कुक्कुटो वन्यस्तद्वद्ग्राम्यो गुरुस्तु सः। वातरोगक्षयवमीविषमज्वरनाशनः। कपोतपारावतभृङ्गराजपरभृतकोयष्टिककुलिङ्गगृहकुलिङ्गगोक्षोडकडिण्डिमाणकशतपत्रकमातृनिन्दकभेदाशिशुकसारिकावल्गुलीगिरिशालट्वालट्टूषकसुगृहीखञ्जरीटकहारीतदात्यूहप्रभृतयः प्रतुदाः। कषायमधुरा रूक्षाः फलाहारा मरुत्कराः। पित्तश्लेष्महराः शीता बद्धमूत्राल्पवर्चसः। सर्वदोषकरस्तेषां भेदाशी मलदूषकः। कषायस्वादुलवणो गुरुः कालकपोतकः। रक्तपित्तप्रशमनः कषायविशदोऽपि च। विपाके मधुरश्चापि गुरुः पारावतः स्मृतः। कुलिङ्गो मधुरः स्निग्धः कफशुक्रविवर्द्धनः। रक्तपित्तहरो वेश्मकुलिङ्गस्त्वतिशुक्रलः। सिंहव्याघ्रवृकतरक्ष्वृक्षद्वीपिमार्जारशृगालमृगेर्वारुकप्रभृतयो गुहाशयाः। मधुरा गुरवः स्निग्धा बल्या मारुतनाशनाः। उष्णवीर्य्या हिता नित्यं नेत्रगुह्यविकारिणाम्। काककङ्ककुररचाषभासशशघात्युलूकचिल्लिश्येनगृध्रप्रभृतयः प्रसहाः। एते सिंहादिभिः सर्वे समाना वायसादयः। रसवीर्य्यविपा-